PAPER - 4

# MT

2017 .... .... 1200

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - IV**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

---

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
द्वितीयं युवकं ............... दृष्ट्वा ............ पृष्टम् ।
(उद्विग्नमनसं / शान्तचेतसं) (नागार्जुनेन / महाराजेन)

(ii) कः कं वदति ? १
तस्मै किमर्थं सहायकपदं दत्तम् ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
प्रथमः युवकः रुग्णस्य सेवां कृतवान् ।

अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, महाशय, अहंरसायनं कृत्वा आनीतवान् । पश्यतु भवानिति । द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, कथमिदानीम् अभाषमाणः तिष्ठसि? किं त्वया नानीतं रसायनम् ? तदाकर्ण्य स मन्दस्वरेण अगदत्, आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति । तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम् ? इति राज्ञा पृष्टे नागार्जुनोऽभणत्, एतेन रोगिणः सेवा कृता, मानवता दर्शिता । सेवाभावेन विना कथं चिकित्सको भवेत्? अतः अस्यैव नियुक्तिः मया कृता । सेवाभावः परमगहनोऽतः स एव परीक्षणीयः इति यत् कथ्यते तद्यथार्थमेव ।

**२. स्वमतप्रकटनम् ।**
नागार्जुनस्य निर्णयविषये भवत्प्रतिक्रियां माध्यमभाषया लिखत । २

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
'कबड्डी' इति भारतीया .......... क्रीडा .......... विशेषरूपेण लोकप्रियतां गता ।
(साङ्घिकी / वैयक्तिकी) (उत्तरभारते / महाराष्ट्रराज्ये)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

तुकाराममहाराजस्य अभङ्गवचनेषु कबड्डीक्रीडा कैः नामभिः निर्दिष्टा अस्ति ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

बङ्गदेशे ‘चेडुगुडु’ इति नाम्ना विख्यातैषा क्रीडा ।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः । काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिकक्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता । ‘हुतुतू’ इति तस्या अपरनाम । तुकाराम-महाराजस्य अभङ्गवचनेषु एषा क्रीडा ‘हमामा, हुंबरी, हुतुतू’ इत्यादिभिः नामभिः निर्दिष्टा । बङ्गदेशे ‘हुडू’, दक्षिणभारते चेडुगुडु, उत्तरभारते ‘कबड्डी’ इति नाम्ना विख्यातैषा क्रीडा । अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति । पञ्च क्रीडापटवो बहिस्तिष्ठन्ति । एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति । अनया कबड्डी-क्रीडया शरीरचापल्यम्, उत्साहः, आक्रमकत्वं, स्वसंरक्षणवृत्तिः, शरीरसौष्ठवं च लभते । साहसं, निरीक्षणशक्तिः, योजकत्वं, निर्णयक्षमता, साङ्घिकी भावना, एकात्मता, देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति । एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यमिति ।

२. **पृथक्करणम् ।** २




**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं चिनुत । १

१) पाषाणः, अश्मा, ग्रावा, धरा ।

२) श्रेयः, दक्षः, सतर्कः, अवहितचित्तः ।

(ii) मेलनं कुरुत । १

| विशेषणम् | विशेष्यम् |
|---|---|
| अवहितचित्ता | निषिद्धम् |
| उपयोजनम् | युक्तम् |
| | मधुरा |

(iii) गद्यांशे आगते द्वे पूर्वकालवाचक धातुसाधित त्वान्त-अव्यये लिखत । १

| | | |
|---|---|---|
| माता | - | ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः | | यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं |
| शाकविक्रेता | - | गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय । |
| माता | - | युक्तमुक्तं भवता । |
| प्रथमः | - | (तोलयित्वा ददाति) गृह्णातु भवती । क्षम्यताम् । |
| शाकविक्रेता | | |
| माता | - | कथं प्लास्टिकस्यूतं ददासि ? वस्त्रस्यूतः मत्समीपे वर्तते । |
| मधुरा | - | पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानामुपयोगः न करणीयः । विधिनापि तेषामुपयोजनं निषिद्धमस्ति । |
| माता | - | समीचीनं, जाते, एवं सदैव अवहितचित्ता भव । |
| प्रथमः | | धन्यवादाः । भवती मां ज्ञापितवती ग्राहकाधिकारविषये । अद्यप्रभृति |
| शाकविक्रेता | - | ISI चिह्नाङ्कितान्येव परिमाणानि योजयामि । नमो नमः। |

२. **पृथक्करणम् ।**

**क्रमसंयोजनं कुरुत ।** २

(i) प्रथमशाकविक्रेता शाकं तोलयति ।

(ii) द्वितीयः शाकविक्रेता परिमाणानि ददाति ।

(iii) प्रथमशाकविक्रेता प्लास्टिकस्यूतं ददाति ।

(iv) माता ग्राहकाधिकारविषये कथयति ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

ज्ञानतेजसो महान् निधिस्त्वं दयाघनस्त्वं तपोनिधिस्त्वम् ।
अनिशं शिष्यहितस्य चिन्तनं गुरुचरणाभ्यां सदा वन्दनम् ।।१।।
कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ।।२।।

१. **शब्दज्ञानम् ।**

**पर्यायपदं मेलयत ।** १

| अ | ब |
|---|---|
| i) पाणिः | मृद् |
| ii) मृत्तिका | हस्तः |
| | पाषाणः |

२. **पृथक्करणम् । (मञ्जूषातः उचितान् पर्यायान् चित्वा जालचित्रं पूरयत ।)** २




**(पाषाणः, कुम्भकारः, मूर्तिकारः, मृत्तिका)**

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

वेतसो वेगमायातं दृष्ट्वा नमति नापरे ।
सरिद्वेगे व्यतिक्रान्ते स्थानमासाद्य तिष्ठति ॥१॥
कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः ।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ॥२॥
एवमेव यदा विद्वान् मन्यतेऽतिबलं रिपुम् ।
संश्रयेद् वैतसीं वृत्तिमेतत् प्रज्ञानलक्षणम् ॥३॥

१. **अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
कीदृशः वेतसः न अभ्येति ?

२. **तात्पर्यलेखनम् / स्पष्टीकरणम् ।** २
तृतीयश्लोकस्य आधारेण भीष्मः किं पाठितवान् इति माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**
**श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २
(i) शस्त्रैर्हतास्तु ............. हन्ति ॥
(ii) शनैः शनैश्च ............. कदाचन ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) पञ्चैते गृहिणा पोष्या | शाम्यति कोऽर्थः पटोलेन । |
| (ii) साम्नैव यत्र सिद्धिर्न | इतरे च स्वशक्तितः । |
| (iii) अतिथिर्बालकः पत्नी | तत्र दण्डो बुधेन विनियोज्यः । |
| (iv) पित्तं यदि शर्करया | जननी जनकस्तथा । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | सप्तमी एकवचनम् | प्रथमा द्विवचनम् | षष्ठी बहुवचनम् |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अस्माकम्, नाम्नी, अस्याम्, दिशाम्, नगर्याम्, ते)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(लङ्घयेत्, जायते, अभुनक्, शशाक, तनुताम्, क्रेष्यति)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**कोष्ठकपूर्तिं कुरुत ।**

| | समस्तपद | विग्रहः | समासनाम |
|---|---|---|---|
| (i) | अश्वाधिरूढा | अश्वम् अधिरूढा । | ............. |
| (ii) | अहर्निशम् | ............. । | समाहार द्वन्द्व समास |
| (iii) | न्यायप्रासादः | ............. । | चतुर्थी तत्पुरुष समास |
| (iv) | सुमार्गः | शोभनः मार्गः । | ............. |
| (v) | निर्गुणः | निर्गताः गुणाः यस्मात् सः । | ............. |
| (vi) | काशीनगरम् | ............. । | कर्मधारय समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ........ समीपे परिमाणानि न सन्ति । ( तस्मै / तव / तम् )

(ii) ........ कृते दुग्धमावश्यकम् । (बालकेषु / बालकान् / बालकानाम् )

(iii) उचितं ........ विना पापान्मुक्तिरशक्या । ( प्रायश्चित्तं / प्रायश्चित्तस्य / प्रायश्चित्ते )

(iv) ........ दूरं गत्वा सः मनः शान्तिमनुभवितुमैच्छत् । (नगरम् / नगरस्य / नगरात् )

(v) शिक्षकस्य ........ अनुसृत्य छात्राः व्यवहरन्ति । (आदेशेन / आदेशम् / आदेशाय)

(vi) माता ........ भोजनं यच्छति । (पुत्रे / पुत्रस्य / पुत्राय)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) चिह्नाङ्कितान्येव = ......... + एव ।

(ii) ......... = काश्चित् + च ।

(iii) प्रचलितोऽस्ति = ......... + अस्ति ।

(iv) ......... = विख्याता + एषा ।

(v) पापधिरेव = ......... + ......... ।

(vi) पुरीञ्च = पुरीम् + ......... ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) मराठीभाषायां ......... वचने । (2)

(ii) देवपूजायां ......... उपचाराः । (16)

(iii) ......... पद्यपाठः अद्यैव पठितः अस्माभिः । (5th)

(iv) चैत्रमासे ......... तिथौ श्रीरामः अजायत । (9th)

(v) अयं मे वयस्यः ......... विदेशं गतः । (thrice)

(vi) देवनाम ......... उच्चार्य सर्वे उपविष्टाः । (10 times)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| पत्रवाहकेन | श्लोकः | आनीतम् |
| तया | पुष्पाणि | लिखितः |
| त्वया | भोजनं | खादितम् |
| अस्माभिः | पत्रं | क्रीतानि |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

वर्षाकाले कज्जलवर्णैः मेघैः वारंवारं व्याप्तं भवति गगनम् । ग्रीष्मे तप्ता वसुधा ........ शाम्यति। महता वेगेन प्रवहन्ति नद्यो नदाश्च । वर्षासमये जलवर्षणे सञ्जीवितानि सस्यानि ........ । सर्वा भूमिः सस्यशामला सञ्जायते। वर्षाकालः खलु न केवलं ........ अपि तु सर्वस्य जगतः जीवितम् । ........ विना न कदापि सस्यं तिष्ठेत् । लोकोऽपि नैव तिष्ठेत् सस्यं विना । यद्यपि वसन्तः ऋतुराजः इति प्रख्यातः, तथापि वर्षाकाले स्थिताः सकलस्य भुवनस्य प्राणाः।

( प्ररोहन्ति, कृषीवलानाम्, जलधाराभिः, सलिलेन)

**Best of Luck**